कृति इति किम्? वृत्रहच्छत्रम्, [1]वृत्रहच्छाया, 'छे च' (६.१.७३/१४६) इति तुग् भवति[2]। अत्र सिद्धे सत्यारम्भो नियमार्थः' (कात.प. ६२), एतेष्वेव नलोपो असिद्धो भवति, नान्यत्र। तेन [3]राजीयति, राजायते, राजाश्वः इति ईत्वम्, दीर्घत्वम्, एकादेशश्च [4]सिद्धो भवति ॥

## न मु ने। (३/४३९)

[5]मुभावो नाभावे कर्तव्ये न असिद्धो भवति। किं तर्हि? सिद्ध एव[6]। अमुना। मुभावस्य असिद्धत्वात् [7]घिलक्षणो नाभावो न स्यात्। कृते तु नाभावे मुभावस्य असिद्धत्वात्, 'सुपि च' (७.३.१०२/२०२) इति दीर्घत्वं [8]यत् प्राप्नोति, तत् 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या.प. १२) इति न भवति। अथवा योगद्वयमिदमुभयार्थं तन्त्रेणोच्चारितम्[9]। अथ वा ने परतो यत् प्राप्नोति तस्मिन् कर्तव्ये मुभावो [10]नासिद्धः इत्येष एवात्र[11] सूत्रार्थः। ने [12]तु कर्तव्ये मुभावस्य यत् सिद्धत्वं तदर्थात् सङ्गृहीतम्। तेनात्र मुभावस्य सिद्धत्वात् नाभावश्च भवति, दीर्घत्वं च न भवति। एकादेशस्वरोऽन्तरङ्गः सिद्धो वक्तव्यः। किं प्रयोजनम्? अयायावेकादेशशतृस्वरैकाननुदात्तसर्वानुदात्तार्थम् (म. भा. ३. ३८९)। वृक्ष इदम्, प्लक्ष इदम्। [13]अत्र प्रातिपदिकान्तसप्तम्येकवचनयोरुदात्तानुदात्तयो[14]रेकादेशः। स 'एकादेश उदात्तेनोदात्तः' (८.२.५/३६५८) [15]इत्युदात्तः। तस्य? सिद्धत्वं वक्तव्यम्। आन्तर्यतः अयादेशः उदात्तो यथा स्यात्। आय् – कुमार्या इदम्[16]। कथमिदमुदाहरणम् यदि 'उदात्तयणो हल्पूर्वात्' (६.१.१७४/३७२०) इत्युदात्तत्वे कृते विभक्तेः 'आटश्च' (६.१.९०/२६९) एकादेशः,[17] तदा भवतीदमुदाहरणम्। अथ तु [18]कृते एकादेशे 'उदात्तयणो हल्पूर्वात्' (६.१.१७४/३७२०) इति [19]स्वरः, तदा नैतदस्य प्रयोजनं भवति। आव् – वृक्षाविदम्। प्लक्षाविदम्। एकादेशः स्वरः – गाङ्गेऽनूप इति गाङ्गेशब्दे[20] एकारः[21] 'एकादेश उदात्तेनोदात्तः' (८.२.५/३६५८) इति उदात्तः। तस्य सिद्धत्वात् य पुनः 'एङः पदान्तादति' (६.१.१०९/८६) इति एकादेशः स 'एकादेश उदात्तेनोदात्तः' (८.२.५/३६५८) इति, अत 'स्वरितो वाऽनुदात्ते पदादौ' (८.२.६/३६५९) इत्येतद् भवति। शतृस्वरः – तुदती। [22]नुदती। अदुपदेशात् (६.१.१८६/३७३०) इति लसार्वधातुकानुदात्तत्वे कृते एकादेशः, तदुदात्तस्य सिद्धत्वात् 'शतुरनुमो नद्यजादी' (६.१.१७३/३७१९) अन्तोदात्तात् इत्येष स्वरो भवति। अनुम (६.१.१७३/३७१९) इति प्रतिषेधो [23]ज्ञापकः, एकादेशस्वरः शतृस्वरे सिद्धः इति। नहि [24]सनुम्कं शत्रन्तं किञ्चिद् एकादेशस्वरमन्तरेण अन्तोदात्तमस्ति। [25]एकाननुदात्तः – तुदन्ति। [26]लिखन्ति। एकादेशस्वरस्य सिद्धत्वात् तेन 'अनुदात्तं पदमेकवर्जम्' (६.१.१५८/३६५०) [27]इति वर्ज्यमानता भवति। [28]सर्वानुदात्तः – ब्राह्मणास्तुदन्ति। ब्राह्मणाः लिखन्ति। एकादेशस्वरस्य सिद्धत्वात् कृते तस्मिन् 'तिङ्ङतिङः' (८.१.२७/३९३५) इति निघातो भवति। अन्तरङ्ग इति वचनाद् बहिरङ्गस्य असिद्धत्वमेव, पचतीति, प्रपचतीति।

---

1. बृहच्छाया ब.क. 2. एव इत्यधिकम् ब. 3. राज्ञीयति क. 4. प्रतिसिद्धो ह. 5. मुभावेन क. 6. भवति इत्यधिकम् क.इ. 7. विलक्षणो ब. 8. यत् नास्ति ब. 9. द्रष्टव्यम् इत्यधिकम् ब. क. इ. ह. ड. 10. असिद्धो न भवति ब. 11. अत्र नास्ति ब. 12. तु नास्ति ब, ननु कर्तव्ये क. 13. इत्यत्र ब. क. 14. यः एकदेशः ब.क. 15. इत्युदात्तः नास्ति क. 16. वदामि इत्यधिकम् क. 17. आद्युदात्तो वक्तव्यः इत्यधिकम् ब. 18. यदेकादेशे क. 19. एष इत्यधिकम् क. 20. यः इत्यधिकम् ब. 21. सः इत्यधिकम् ब. 22. तुदन्ती क ह. 23. ज्ञापकम् क, कथं अनुम इति नुम् प्रतिषेधे ज्ञापकम् इ.ह. 24. सनुकम् क. 25. एकाननुदात्तम् क.इ. 26. तुदन्ति ब.इ.ह.ड. 27. इत्यनेन ब. इति अनेकवर्जमनुदात्तं न भवति क. 28. सर्वानुदात्तम् क.इ.